# Kumaravirachitam Parvati Stava

# कुमारविरचितं पार्वतीस्तवः

## Document Information

Text title : Kumaravirachitam Parvati Stava

File name : pArvatIstavaHkumAravirachitaH.itx

Category : devii, devI, pArvatI, shivarahasya

Location : doc_devii

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 13| 29-43||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 7, 2023

*sanskritdocuments.org*

# कुमारविरचितं पार्वतीस्तवः

उमा गौरी महाकाली महागौरी शिवा सती ।
शर्वाणी चण्डिका दुर्गा रुद्राणी गिरिकन्यका ॥ १॥

मृडानी पार्वती माया महामाया महेश्वरी ।
अपर्णा शाम्भवी भद्रा शुभा त्रिपुरभैरवी ॥ २॥

श्रीः सर्वमङ्गला लक्ष्मीः भवानी दक्षकन्यका ।
आर्या हैमवती चेति स्मृत्वा जयमवाप्नुयात् ॥ ३॥

एकैकमपि यन्नाम गौर्यास्तद्दुःखनाशकम् ।
जयदं धनदं चैतत् आयुर्वृद्धिकरं परम् ॥ ४॥ (जयप्रदमिदं चैतत्)

ततः कुमार तां गौरीं स्मृत्वा युद्धाय याहि ते ।
जयो भवत्यसन्दिग्धं तन्नाम जयदं यतः ॥ ५॥

स्मृत्वापि गौरीं गिरिराजकन्यां धन्यां च मान्यां च कलङ्कशून्याम् ।
दुर्गामनन्यामपि भावयन्तः सद्यो भवन्त्येव हि भाग्यवन्तः ॥ ६॥

स्मृत्वापि यां पातकमागरेभ्यो निर्गत्य सङ्गत्य च सौख्यसङ्घैः ।
स्वर्गं समेत्याप्यपवर्गमेत्य तिष्ठन्ति भाग्येन नराः शिवाग्रे ॥ ७॥

यद्दृष्टिपातेन जगत्समस्तमुत्पन्नमेतत् परिपालितं च ।
कल्पावसाने प्रलयं प्रयाति सा देवता मङ्गलदेवता या ॥ ८॥

यत्पादपद्मस्मरणं मुनीनां तपस्यया केवलमम्बिका सा ।
स्मृता सदा सर्व सुखप्रदात्री सैषा विधात्री सुखसागराणाम् ॥ ९॥

यामन्नपूर्णां प्रवदन्ति देवाः स्तुवन्ति गन्धर्वगणा मुनीन्द्राः ।
मर्त्याश्च तत्पादरजःप्रसादात् रमादिभिः सा खलु पूजनीया ॥ १०॥ (रमादयः)

यस्याः कटाक्षप्रसरेण धन्यो दीनो दरिद्रः कृपणोऽपि धन्यः ।
मान्यः सुराणां धनसागराणामधीश्वरः स्यादिति तां भजाम्याम् ॥ ११॥

यत्पादपद्माम्बुजरेणुलेशं दधार शौरिर्धृतकूर्मरूपः ।
शेषः सहस्रेण दधार मूर्ध्ना सैपा भवानी शुभराजधानी ॥ १२॥

कुलाचलैः मेरुसमानधैर्यैः अतिप्रयत्नेन विभुग्नकायैः ।
यत्पादपद्माम्बुजरेणुशैलो धृतो मुदा सा गिरिजा सदाऽम्बा ॥ १३॥

दिग्दन्तिभिर्यत्पदपद्मरेणुः धृतः स्वकुम्भस्थलपङ्किलोऽपि ।
मदाम्बुधारापरिवीतगात्रैः तद्धारणायासगतैः स्वतन्त्रैः ॥ १४॥

यत्पादपद्माम्बुरुहार्चनाय रत्नाकरो नूतनरत्नजालम् ।
सम्पादयत्यन्वहमादरेण सा किं न गौरी तव पूजनीया ॥ १५॥

॥ इति शिवरहस्यान्तर्गते कुमारविरचितं पार्वतीस्तवः सम्पूर्णः ॥

- ॥ श्रीशिवरहस्यम् । हराख्यः तृतीयांशः । पूर्वार्धम् । अध्यायः १३। २९-४३॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 13. 29-43..

Proofread by Ruma Dewan

*Kumaravirachitam Parvati Stava*

pdf was typeset on May 7, 2023

Please send corrections to *sanskrit@cheerful.com*